योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः ०४

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

सौम्याम्बुत्वे तरङ्गत्वे सलिलस्याम्बुता यथा ।

समैवाब्धौ तथाऽदेहसदेहमुनिमुक्तता ।। १

सदेहा वास्त्वदेहा वा मुक्तता विषये न च ।

अनास्वादितभोगस्य कुतो भोज्यानुभूतयः ।। २

जीवन्मुक्त मुनिश्रेष्ठं केवलं हि पदार्थवत् ।

पश्यामः पुरतो नास्य पुनर्विघ्नोऽन्तराशयम् ।। ३

सदेहादेहमुक्तानां भेदः को बोधरूपिणाम् ।

यदेवाम्बुतरङ्गत्वे सौम्यत्वेऽपि तदेव तत् ।। ४

न मनागपि भेदोऽस्ति सदेहादेहमुक्तयोः ।

सस्पन्दोऽप्यथवाऽस्पन्दो वायुरेव यथानिलः ।। ५

सदेहा वा विदेहा वा मुक्तता न प्रमास्पदम् ।

अस्माकमपि तस्यास्ति स्वैकतास्त्यविभागिनी ।। ६

तस्मात्प्रकृतमेवेदं शृणु श्रवणभूषणम् ।

मयोपदिश्यमानं त्वं ज्ञानमज्ञान्ध्यनाशनम् ।। ७

सर्वमेवेह हि सदा संसारे रघुनन्दन ।

सम्यक्प्रयुक्तात्सर्वेण पौरुषात्समवाप्यते ।। ८

इह हीन्दोरिवोदेति शीतलाह्लादनं हृदि ।

परिस्पन्दफलप्राप्तौ पौरुषादेव नान्यतः ।। ९

पौरुषं स्पन्दफलवद्दृष्टं प्रत्यक्षतो नयत् ।

कल्पितं मोहितैर्मन्दैर्दैवं किंचिन्न विद्यते ।। १०

साधूपदिष्टमार्गेण यन्मनोङ्गविचेष्टितम् ।

तत्पौरुषं तत्सफलमन्यदुन्मत्तचेष्टितम् ।। ११

यो यमर्थं प्रार्थयते तदर्थं चेहते क्रमात् ।

अवश्यं स तमाप्नोति न चेदर्धान्निवर्तते ।। १२

पौरुषेण प्रयत्नेन त्रैलोक्यैश्वर्यसुन्दराम् ।

कश्चित्प्राणिविशेषो हि शक्रतां समुपागतः ।। १३

पौरुषेणैव यत्नेन सहसाम्भोरुहास्पदम् ।

कश्चिदेव चिदुल्लासो ब्रह्मतामधितिष्ठति ।। १४

सारेण पुरुषार्थेन स्वेनैव गरुडध्वजः ।

कश्चिदेव पुमानेव पुरुषोत्तमतां गतः ।। १५

पौरुषेणैव यत्नेन ललनावलिताकृतिः ।

शरीरी कश्चिदेवेह गतश्चन्द्रार्धचूडताम् ।। १६

प्राक्तनं चैहिकं चेति द्विविधं विद्धि पौरुषम् ।

प्राक्तनोऽद्यतनेनाशु पुरुषार्थेन जीयते ।। १७

यत्नवद्भिर्दृढाभ्यासैः प्रज्ञोत्साहसमन्वितैः ।

मेरवोऽपि निगीर्यन्ते कैव प्राक्पौरुषे कथा ।। १८

शास्त्रनियन्त्रितपौरुषपरमा पुरुषस्य पुरुषता या स्यात् ।

अभिमतफलभरसिद्ध्यै भवति हि सैवान्यथा त्वनर्थाय ।। १९

कस्यांचित्स्वयमात्मदुःस्थितिवशात्पुंसो दशायां शनै

रङ्गुल्यग्रनिपीडितैकचुलुकादावापबिन्दुर्बहुः ।

कस्यांचिज्जलराशिपर्वतपुरद्वीपान्तरालीकृता

भर्तव्योचितसंविभागकरणे पृथ्वी न पृथ्वी भवेत् ।।

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे पौरुषप्रकरणं नाम चतुर्थः सर्गः ।। ४ ।।